निरमात्कविर्गुमानिः शतोपदेशप्रबन्धममुम्” ॥)
कुतुपं, क्ली पुं, ( कुतप+पृषोदरादित्वात् साधुः ।) कुतपः । दिनस्याष्टममुहूर्त्तः । इति शब्दरत्नावली ॥
कुतुपः, पुं, (ह्रस्वा कुतूः ततो डुप् च । ततः पृषोदरात् अकारागमे साधुः ।) चर्म्मनिर्म्मितात्पस्नेहपात्रम् । इत्यमरः । २ । ९ । ३३ ॥ छोट कुपो इति भाषा ॥
कुतूः, स्त्री, (कुत्सितं तन्यते । तन् बाहुलकात् कूः । टिलोपश्च ।) चर्म्मनिर्म्मितस्नेहपात्रम् । इत्यमरः । २ । ९ । ३३ ॥ मसक इति कुपो इति च भाषा ॥
कुतूणकः,पुं,(कु ईषत् तूणयति सङ्कोचयति चक्षुः यः । कु+तूण सङ्कोचे+ण्वुल् ।) बालरोगविशेषः । स तु नेत्ररोगः । कतुया इति भाषा । तस्य लक्षणम् ॥
“कुतूणकः क्षीरदोषाच्छिशूनामेव वर्त्मनि ।
जायते तेन तन्नेत्रं कण्डूरञ्च स्रवेन्मुहुः ॥
शिशुः कुर्य्याल्ललाटाक्षिकूटनासावघर्षणम् ।
शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः” ॥
इति माधवकरः ॥ कुकूणक इत्यपि पाठः ॥
(यथा,—
“कुकूणकः शिशोरेव दन्तोत्पत्तिनिमित्तजः ॥
स्यात्तेन शिशुरच्छूनताम्राक्षो वीक्षणाक्षमः ।
स वर्त्मशूलपैच्छिल्यकर्णनासाक्षिमर्द्दनः” ॥
इत्युत्तरतन्त्रे ८ अध्याये वाभटेनोक्तम् ॥ * ॥
चिकित्सा यथा ॥
“शुण्ठी भृङ्गनिशाकल्कः पुटपाकः ससैन्धवः ।
कुकूणकेऽक्षिरोगेषु भद्रमाश्चोतनं हितम् ॥
क्रिमिघ्नलशिलादार्व्वी लाक्षाकाञ्जिकगैरिकैः ।
चूर्णाञ्जनं कुकूणे स्याच्छिशूनां पोथकीषु च ।
सुदर्शनामूलचूर्णादञ्जनं स्यात् कुकूणके” ॥
इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे ॥)
कुतूहलं, क्ली, ( कुतूं चर्म्ममयतैलादिपात्रवत् अन्तर्हलति सोत्सुकं करोति । हल्+अच् ।) अपूर्व्ववस्तुदिदृक्षायातिशयः । तत्पर्य्यायः । कौतूहलम् २ कौतुकः ३ कुतुकम् ४ । इत्यमरः । १ । ७ । ३१ ॥ चित्रम् ५ । इति शब्दरत्नावली । (यथा, नैषधे । १ । ११९ ।
“प्रियावियोगाद्विधुरोऽपि निर्भरं
कुतूहलाक्रान्तमना मनागभूत्” ॥
नायिकालङ्कारविशेषः । तल्लक्षणं यथा साहित्यदर्पणे । ३ । ११९ ।
“रम्यवस्तुसमालोके लोलता स्यात्कुतूहलम्” ॥)
कुतूहलः, त्रि, प्रशस्तः । अद्भुतः । इति हेमचन्द्रः ॥
कुत्वं, क्ली, (कुत्सितं तुम्बमिव ।) कुम्भी । इति हारावली । पाना इति भाषा ॥ (कुम्भिकाशब्देऽस्य विवृतिर्ज्ञेया ॥)
कुत्र, अ, ( “सप्तम्यास्त्रल्” । ५ । ३ । १० । इति त्रल् ।) कस्मिन् इति व्याकरणम् । कोथाय इति भाषा ॥ (यथा, महानाटके ।
“हा ! सीता केन नीता मम हृदयगता केन वा कुत्र दृष्टा” ॥)
कुत्रचित्, अ, ( कुत्र च चित् च इति द्वन्द्वसमासः । मुग्धबोधमते “किमः त्रयन्ताच्चिच्चनौ” । इति-चित् ।)कोनखाने इति भाषा । इति व्याकरणम् । (यथा महाभारते । ३ । १४२ । ५३ ।
“असुरेभ्यो भयं नास्ति युष्माकं कुत्रचित् क्वचित्” ॥)
कुत्स ङ क ज अवक्षेपे । इति कविकल्पद्रुमः ॥ चुरां-आत्मं-उभयं-सकं-सेट् ।) पञ्चमस्वरी । दन्त्यवर्गाद्योपधः । अवक्षेपो निन्दा । ङ क,यो न कुत्सयते कुत्स्यमिति हलायुधः । ञ, कुत्सयति कुत्सयते । अयमात्मनेपदीत्यन्ये । कदाचित् परस्मैपदार्थो ञकारः । इति दुर्गादासः ॥
कुत्सनं, क्ली, ( कुत्स्+भावे ल्युट् । ) निन्दनम् । इति शब्दरत्नावली ॥ (यथा मनौ ४ । १६३ ।
“नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम्” ॥
कुत्स्यते निन्द्यतेऽनेन । करणे ल्युट् । निन्दासाधनधर्म्मः । त्रि कुत्सायुक्तः ॥)
कुत्सला, स्त्री ( कुत्सं क्रयविक्रययोर्निषिद्धतया निन्दां लाति । ला+कः+टाप् ।) नीलीवृक्षः । इति शब्दचन्द्रिका ॥
कुत्सा, स्त्री, (कुत्स् निन्दने+भावे अप्-टाप् च ।) कुत्सनम् । तत्पर्य्यायः । अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ अपवादः ६ उपक्रोशः ७ जुगुप्सा ८ निन्दा ९ गर्हणम् १० । इत्यमरः । १ । ६ । १३ ॥ गर्हा ११ निन्दनम् १२ कुत्सनम् १३ परिवादः १४ जुगुप्सनम् १५ अपक्रोशः १६ भर्त्सनम् १७ अपवादः १८ । इति शब्दरत्नावली ॥ उपरागः १९ अवध्वंसः २० घृणा २१ धिक् २२ सामि २३ । इति जटाधरः ॥
कुत्सितं,क्ली, (कुत्स्+कर्म्मणि क्तः ।) कुष्ठनामौषधम् । इति राजनिर्घण्टः ॥ (कुड् इति भाषा ॥)
कुत्सितः, त्रि, (कुत्स्+क्तः ।) निन्दितः । तत्पर्य्यायः । निकृष्टः २ प्रतिकृष्टः ३ अर्व्वा ४ रेफः ५ याप्यः ६ । अवमः ७ अधमः ८ कुपूयः ९ अवद्यः १० खेटः ११ गर्ह्यः १२ अणकः १३ इत्यमरः । ३ । १ । ५४ ॥ रेपः १४ अरमः १५ आणकः १६ अनकः १७ । इति तट्टीका ॥ कुप्रियः १८ । इति जटाधरः ॥ आखेटः १९ रेपसः २० काण्डः २१ गर्हितः २२ अपकृष्टकः २३ । इति शब्दरत्नावली ॥
कुथ इ क्लेशे । वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकञ्च-सेट् इदित् ।) पञ्चमस्वरी । इ कर्म्मणि कुन्थ्यते । क्लेश इह दुःखानुभवः । शीतार्त्तश्च न कुन्थतीति हलायुधः । इति दुर्गादासः ॥
कुथ य पूतिभावे । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट् ।) पूतिभावः दुर्गन्धीभावः । य, कुथ्यति मीनो दुर्गन्धः स्यादित्यर्थः । चुकोथ । इति दुर्गादासः ॥
कुथः, पुं स्त्री, (कुथ्यति अशोभां क्लेशं वा । कुथ इ हिंसायां अच् । आगमविधेरनित्यत्वात् न नुमागमः । ) गजपृष्ठस्थितचित्रकम्बलम् । हातिर पिठेर झुल इति भाषा । तत्पर्य्यायः । प्रवेणी २ आस्तरणम् ३ वर्णः ४ परिस्तोमः ५ । इत्यमरः । २ । ८ । ४२ ॥ प्रवेणिः ६ परिस्तोमः ७ कुथा ८ कुथम् ९ । इति तट्टीका ॥ वोलः १० आस्तरः ११ । इति शब्दरत्नावली ॥ (यथा शब्दार्थचिन्तामणौ ।
“कुथा कन्था समाख्याता कुथः स्यात् करिकम्बलम् ।
कुथः कुशः कुथः कीटः प्रातःस्नायी द्विजः कुथः” ॥
यथा महाभारते २ । ५१ । ३६ ।
“शतश्च कुथांस्तत्र सिंहलाः समुपाहरन्” ॥)
कुथः, पुं, (कुथ+अच् ।) कुशतृणम् । इत्यमरः । २ । ४ । १६६ ॥ (यथा हेः रामायणे । २ । ३० । १४ ।
“शाद्वलेषु यदा शिश्ये वनान्ते वनगोचरा ।
कुथास्तरणतल्पेषु किं स्यात् सुखतरं ततः” ॥)
कुथोदरी, स्त्री, (कुथं हिंसात्मकमुदरं यस्याः सा ।) निकुम्भदुहिता । कुम्भकर्णपौत्री । सा च कल्किदेवेन हता । यथा ।
मुनय ऊचुः ।
“शृणु विष्णुयशःपुत्त्र ! कुम्भकर्णात्मजात्मजा ।
कुथोदरीति विख्याता गगनार्द्धसमुत्थिता ॥
कालकञ्जस्य महिषी विकञ्जजननी च सा ।
हिमालये शिरः कृत्वा पादौ च निषधाचले ॥
शेते स्तनं पाययन्ती विकञ्जं प्रस्नुतस्तनी ।
तस्या निश्वासवातेन विवशा वयमागताः ॥
दैवेनैव समानीताः प्राप्तास्तव पदाम्बुजम् ।
मुनयो रक्षणीयास्ते रक्षःसु च विपत्सु च ॥
इति तेषां वचः श्रुत्वा कल्किः परपुरञ्जयः ।
सेनागणैः परिवृतो जगाम हिमवद्गिरिम्” ॥
इत्यादि ॥
“सा कुधोत्थाय सहसा ननर्द परमाद्भुतम् ।
तेन नादेन महता विह्वलास्त्वभवन् जनाः ।
निपेतुः सैनिकाः सर्व्वे मूर्च्छिता धरणीतले ॥
सा रथांश्च गजांश्चापि विवृतास्या भयानका ।
जघास प्रश्वासवातैः समानीय कुथोदरी ॥
सेनागणास्तदुदरं प्रविष्टाः कल्किना सह ।
यथर्क्षमुखवातेन प्रविशन्ति पिपीलिकाः ॥
तद्दृष्ट्वा देवगन्धर्व्वा हाहाकारं प्रचक्रिरे ।
तत्रस्था मुनयः शेपुर्जेपुश्चान्ये महर्षयः ॥
निपेतुरन्ये दुःखार्त्ता ब्राह्मणा ब्रह्मवादिनः ।
ररुदुः एकयोधा ये जह्नुस्तन्निशाचराः ॥
जगतां कदनं दृष्ट्वा सस्मारात्मानमात्मना ।
कल्किः कमलपत्राक्षः सुरारातिनिसूदनः ॥
वाणाग्निं चेलचर्म्मभ्यां काष्ठैर्यानदारुभिः ।
प्रज्वाल्योदरमध्येन करवालं समाददे ।
तेन खड्गेन महता कुक्षिं निर्भिद्य बन्धुभिः ।
बलिभिर्भ्रातृभिर्व्वीरैर्वृतः शस्त्रास्त्रपाणिभिः ॥
वहिर्ब्बभूव सर्व्वेशः कल्किः कल्कविनाशनः ।
सहस्राक्षो यथा वृत्रकुक्षिं दम्भोलिनेमिना ॥
योनिरन्ध्राद्गजरथास्तुरगाश्चाभवन् वहिः ।
नासिकाकर्णविवरात् केऽपि तस्या विनिर्गताः ॥
ते निर्गतास्ततस्तस्याः सैनिकारुधिरोक्षिताः ।
तां विपृष्णुर्निःश्वसन्तीं तरसा चरणौ करौ ॥
ममार सा भिन्नदेहा भिन्नकुक्षिशिरोधरा ।
नादयन्ती दिशो द्यां खं चूर्णयन्ती च पर्व्वतान्” ।
इति कल्किपुराणे १६ अध्यायः ॥
कुदालः, पुं, (कुं भूमिं दालयति विदारयति । कु+